CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 586

Title Śabdānuśāsana

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 586 Subject: Grammar

Title: Śabdānaśāsana.

Author: Hemacandra Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10.6" by 4.7" Extent: 6 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: – Incomplete.

महाभाष्यं

नाम २

॥श्रीविठ्ठलनाथाय नमः॥ ॥ॐ नमः श्रीभगवत्पाणिनिकात्यायनपतंजलिभ्यः॥ ॥ॐ अथ शब्दानुशासनं॥ ॥अथेत्ययं श-

पु १ ब्दोऽधिकारार्थः प्रयुज्यते। शब्दानुशासनं शास्त्रमधिकृतं वेदितव्यं। केषां शब्दानां। लौकिकानां वैदिकानां च। लौकिकास्ता-

वत्। गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति। वैदिकाः खल्वपि। शंनो देवीरभिष्टये। इषे त्वोर्जे त्वा। अग्निमीळे पुरोहि-

तं। अग्न आयाहि वीतये इत्यादि। अथ गौरित्यत्र कः शब्दः। किं यत्तत्सास्नालांगूलककुदखुरविषाण्यर्थरूपं स शब्दः।

नेत्याह। द्रव्यं नाम तत्। यत्तर्हि तदिंगितं चेष्टितं निमिषितं स शब्दः। नेत्याह। क्रिया नाम सा। यत्तर्हि शुक्लो नीलः कृष्णः कपिलः

कपोत इति स शब्दः। नेत्याह। गुणो नाम सः। यत्तर्हि भिन्नेष्वभिन्नं छिन्नेष्वछिन्नं सामान्यभूतं स शब्दः। नेत्याह। आकृतिर्नाम

सा। कस्तर्हि शब्दः। येनोच्चारितेन सास्नालांगूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः। अथवा प्रतीतपदा-

र्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा। शब्दं कुरु मा शब्दं कार्षीः। शब्दकार्ययं माणवक इति। तस्माद्ध्वनिः शब्दः। कानि पु-

नः शब्दानुशासनस्य प्रयोजनानि। रक्षोहागमलघ्वसंदेहाः प्रयोजनं। रक्षार्थं वेदानामध्येयं व्याकरणं। लोपागमवर्ण- २

विकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति। ऊहः खल्वपि। न सर्वैर्लिंगैर्न च सर्वाभिर्विभक्तिभिर्वेदे मंत्रा निगदिताः। ते चावश्यं यज्ञगते-

नी १ ध्वनिं कुर्वन्नेवमुच्यते ३ चावश्यं १

पुरुषेण १ यज्ञे २ ष्व २

न यथायथं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुं। तस्मादध्येयं व्याकरणं। आगमः ख-

ल्वपि। ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोऽध्येयो ज्ञेय इति। प्रधानं च षट्स्वंगेषु व्याकरणं। प्रधाने च कृतो यत्नः फलवान्भ-

वति। लघ्वर्थं चाध्येयं व्याकरणं। ब्राह्मणेनावश्यं शब्दा ज्ञेया इति न चांतरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुं।

असंदेहार्थं चाध्येयं व्याकरणं। याज्ञिकाः पठंति। स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति। तस्यां संदेहः। स्थू-

ला चासौ पृषती च स्थूलपृषती। स्थूलानि पृषंति यस्याः सा स्थूलपृषती। तां नावैयाकरणः स्वरतोऽध्यवस्यति। यदि पू-

र्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः। अथांतोदात्तत्वं ततस्तत्पुरुष इति। इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि।

तेऽसुराः। दुष्टः शब्दः। यदधीतं। यस्तु प्रयुंक्ते। अविद्वांसः। विभक्तिं कुर्वंति। यो वा इमां। चत्वारि। उत त्वः। सक्तुमिव। सारस्वतीं। सुदेवोऽसि व-

रुणेति। तेऽसुरा हेलयो हेलय इति कुर्वंतः पराबभूवुः। तस्माद्ब्राह्मणेन न म्लेछितवै नापभाषितवै म्लेछो ह वा एष यदपशब्दः।

म्लेछा मा भूमेत्यध्येयं व्याकरणं। तेऽसुराः। दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिन-

स्ति यथेंद्रशत्रुः स्वरतोऽपराधात्। दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणं। दुष्टः शब्दः। यदधीतमविज्ञातं निगदेनैव श-

घते। अनन्तादिवस्तुकैश्येन तज्ज्वलति कहिंचित्वात तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणं। यदधीतं। यस्तु प्रयुंक्ते कुशलो
विशेषे शब्दान्यथावद्व्यवहारकाले। सोऽनंतमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः। कः वाग्योगविदेव। कुत एत
त्। यो हि शब्दान्जानाति। अपशब्दानप्यसौ जानाति। यथैव हि शब्दज्ञाने धर्मः एवमपशब्दज्ञानेप्यधर्मः। अथवा दि
भूयानधर्मः प्राप्नोति भूयांसोपशब्दाः। अल्पीयांसः शब्दाः। एकैकस्य हि शब्दस्य बहवोपभ्रंशाः। तद्यथा। गौरि
गोमा ५ त्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः। अथ योऽवाग्योगवित्। अज्ञानं तस्य शरणं। विषमउ
पन्यासः। नात्यंतं यो ज्ञानं शरणं भवितुमर्हति। यो ह्यज्ञानन्वै ब्राह्मणं हन्यात्सुरां वा पिबेत्। सोपि मन्ये पतितः स्यात्। एवं सो
नंतमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः कः। अवाग्योगविदेव। अथ यो वाग्योगवित् विज्ञानं तस्य शरणं भवितु
मर्हति। क्व पुनरिदं पठितं। भ्राजा नाम श्लोकाः। किं च भोः श्लोका अपि प्रमाणं। किंचातः। यदि प्रमाणं अयमपि प्रमाणं भवि
तुमर्हति। यदुदुंबरवर्णानां घटीनां मंडलं महत्। पीतं न गमयेत्स्वर्गं किं तत्क्रतुगतं नयेदिति। प्रमत्तगीत एषस्तत्रभवतः। यस्त्व २
प्रमत्तगीतस्तत्प्रमाणं। यस्तु प्रयुंक्ते। अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं व

३

देत्। स्त्रीवन्मा भूमेत्यध्येयं व्याकरणं। अविद्वांसः। विभक्तिं कुर्वीत। याज्ञिकाः पठंति। प्रयाजाः सविभक्तिकाः कार्या इति। न
चांतरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुं। विभक्तिं कुर्वंति। यो वा इमां पदशः स्वरशोऽक्षरशो वाचं विदधा
ति स आर्त्विजीनः। आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणं। यो वा इमां। चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्ता
सो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश इति। चत्वारि शृंगाणि पदजातानि नामाख्यातोपसर्गनि
पाताश्च। त्रयो अस्य पादाः त्रयः कालाः भूतभविष्यद्वर्तमानाः। द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्त हस्तासो अस्य स
प्त विभक्तयः। त्रिधा बद्धः त्रिषु स्थानेषु बद्धः उरसि कंठे शिरसीति। वृषभो वर्षणात्। रोरवीति शब्दं करोति। कुत एतत्। रौतिः
शब्दकर्मा। महो देवो मर्त्याँ आविवेश। महान्देवः मर्त्याः मरणधर्माणो मनुष्याः तानाविवेश। महता देवेन नः साम्यं स्यादित्य
ध्येयं व्याकरणं। अपर आह। चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नें
गयंति तुरीयं वाचो मनुष्या वदंति। चत्वारि वाक्परिमिता पदानि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। तानि
विदुर्ब्राह्मणा ये मनीषिणः। मनस ईषिणः। मनीषिणः। गुहा त्रीणि निहितानि नेंगयंति। गुहायां त्रीणि निहितानि ने

एनामिति ३

गयंति। नवेष्ठतेन निमिषंती त्वर्थः। तुरीयं वाचो मनुष्या वदंति। तुरीयं ह वा एतद्वाचो यन्मनुष्येषु वर्त्तते। चतुर्थमित्यर्थः। चत्
वारि। उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां। उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः॥ अ
पि खल्वेकः शृण्वन्नपि न शृणोति। अपि खल्वेकः पश्यन्नपि न पश्यति। अविद्वांसमाहार्धं। उतो त्वस्मै तन्वं विसस्रे तनुं
विवृणुते। जायेव पत्य उशती सुवासाः। जायेव पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते। एवं वाग्विदे स्वात्मानं विवृणुते। वा एकैवाक्‌ ४
ङ्नो विवृणुयादित्यध्येयं व्याकरणं। उत त्वः। सक्तुमिव तितउना पुनंतो यत्र धीरा मनसा वाचमक्रत। अत्रा सखायः सख्यानि जा
नते भद्रैषां लक्ष्मीर्निहिताधि वाचि। सक्तुः सचतेर्दुर्धावो भवति कसतेर्वा विपरीताद्विकसितो भवति। तितउ परिपवनं भवति तत
वद्वा तुन्नवद्वा। धीरा ध्यानवंतो मनसा प्रज्ञानेन वाचमक्रत वाचमकृषत। अत्रा सखायः सख्यानि जानते। अत्र सखायः संतः
सख्यानि जानते। सायुज्यानि जानते। क्व एष दुर्गो मार्गः। किं पुनस्ते। वैयाकरणाः। कुत एतत्। भद्रैषां लक्ष्मीर्निहिताधि वा
चि। एषां वाचि भद्रा लक्ष्मीर्निहिता भवति। लक्ष्मीर्लक्षणाद्भासनात्परिवृढा भवतीति। सक्तुमिव। सारस्वतीं। याज्ञिकाः पठंति। ३
आहिताग्निरपशब्दं प्रयुज्य सारस्वतीमिष्टिं निर्वपेदिति। प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणं। सारस्वतीं। दशम्यां पुत्रस्य।

प्रायश्चित्तीयां १ मो३ एकगम्यो वाग्विषयः ३

याज्ञिकाः पठंति। दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद्घोषवदाद्यंतरंतस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं
सतंर तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कुर्यान्न तद्धितमिति। न चांतरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुं
दशम्यां पुत्रस्य। सुदेवो असि वरुण यस्य ते सप्त सिंधवः। अनुक्षरंति काकुदं सूर्म्यं सुषिरामिव। सुदेवो असि सत्यदेवो असि यस्य ते
सप्त सिंधवः सप्त विभक्तयः। अनुक्षरंति काकुदं। काकुदं तालु। काकुर्जिह्वा सा उद्यतेऽस्मिन्निति काकुदं तालु। सूर्म्यं सुषि
सिवदेवासमम रामिव। तद्यथा शोभनां सूर्मिं सुषिरामग्निरंतः प्रविश्य दहति। एवं तव सप्त विभक्तयस्ताल्वनुक्षरंति। तेनासि सत्यदेवः। सत्यदेवाः स्या ३५
मेत्यध्येयं व्याकरणं। सुदेवो असि। किं पुनरिदं व्याकरणमधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते न पुनरन्यदपि किंचित्। ओमित्यु
क्त्वा वृत्तांतशः शमित्येवमादीन् शब्दान् पठंति। पुराकल्प एतदासीत्। संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते। तेभ्यस्त
वर त्तत्स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यंते। तदद्यत्वे न तथा। वेदमधीत्य त्वरिता वक्तारो भवंति। वेदा
न्नो वैदिकाः सिद्धाः। लोकाच्च लौकिकाः। अनर्थकं व्याकरणमिति। तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्य आचार्य इदं शास्त्र
मन्वाचष्टे। इमानि प्रयोजनान्यध्येयं व्याकरणमिति। उक्तः शब्दः। प्रयोजनान्यप्युक्तानि। शब्दानुशासनमिदानीं कर्त्तव्यं। तत्क

थं कर्त्तव्यं।किं शब्दोपदेशः कर्त्तव्यः।आहोस्विदपशब्दोपदेशः कर्त्तव्यः।आहोस्विदुभयोपदेश इति।अन्यतरोपदेशेन कृतं स्या
त्तद्यथा।भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते।पंच पंचनखा भक्ष्या इत्युक्ते गम्यत एतदतोऽन्येऽभक्ष्या इति।अभक्ष्य
प्रतिषेधेन वा भक्ष्यनियमः।तद्यथा।अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकर इत्युक्ते गम्यत एतदारण्यो भक्ष्य इति
एवमिहापि यदि तावच्छब्दोपदेशः क्रियते।गौरित्येतस्मिन्नुपदिष्टे गम्यत एतत्।गाव्यादयोऽपशब्दा इति।अथाप्यपशब्दो
पदेशः क्रियते।गाव्यादिषूपदिष्टेषु गम्यत एतद्गौरित्येष शब्द इति।किं पुनरत्र ज्यायः।लघुत्वाच्छब्दोपदेशः।लघीयाञ्
शब्दोपदेशः।गरीयानपशब्दोपदेशः।एकैकस्य शब्दस्य बहवोऽपभ्रंशाः।तद्यथा।गौरित्यस्य शब्दस्य गावी गोणी गोता गो
पोतलिकेत्येवमादयोऽपभ्रंशाः।इष्टान्वाख्यानं खल्वपि भवति।अथैतस्मिञ्छब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्र
तिपदपाठः कर्त्तव्यः।गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः।नेत्याह।अनभ्युपाय ४
एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः।एवं हि श्रूयते।बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारा
यणं प्रोवाच।न चान्तं जगाम।बृहस्पतिश्च वक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालः।न चान्तं जगाम।किं

पुनरद्यत्वे यः सर्वथा चिरं जीवति स वर्षशतं जीवति।चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति।आगमकालेन।स्वाध्यायका
लेन प्रवचनकालेन व्यवहारकालेनेति।तत्र चागमकालेनैवायुः पर्युपयुक्तं स्यात्।तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपद
पाठः।कथं तर्हीमे शब्दाः प्रतिपत्तव्याः।किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यं येनाल्पेन यत्नेन महतो महतः शब्दौघान्प्रतिपद्येरन्।
किं पुनस्तदुत्सर्गापवादौ।कश्चिदुत्सर्गः कर्त्तव्यः कश्चिदपवादः।कथंजातीयकः पुनरुत्सर्गः।कथंजातीयकोऽपवादः।सामा
न्येनोत्सर्गः कर्त्तव्यः।तस्य विशेषेणापवादः।तद्यथा।कर्मण्यण्।तस्य विशेषेणापवादः।तद्यथा।आतोऽनुपसर्गे कः।किं पुनराकृतिः
पदार्थः।आहोस्विद्द्रव्यम्।उभयमित्याह।कथं ज्ञायते।उभयथा ह्याचार्येण सूत्राणि पठितानि।आकृतिं पदार्थं मत्वा जा
त्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामित्युच्यते।द्रव्यं पदार्थं मत्वा सरूपाणामित्येकशेष आरभ्यते।किं पुनर्नित्यः
शब्दः।आहोस्वित्कार्यः।संग्रह एतत्प्राधान्येन परीक्षितं।नित्यो वा स्यात्कार्यो वेति।तत्रोक्ता दोषाः प्रयोजनान्यप्युक्तानि।
तत्र त्वेष निर्णयः।यद्येव नित्यः।अथापि कार्यः।उभयथापि लक्षणं प्रवर्त्यमिति।कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्ष
णं प्रवृत्तं॥ ॥सिद्धे शब्दार्थसंबन्धे।सिद्धे शब्देऽर्थे संबन्धे चेति।अथ सिद्धशब्दस्य कः पदार्थः।नित्यपर्यायवाची सिद्धशब्दः।क

घः क्रियते। न कूटस्थेऽविचालिषु भावेषु वर्त्तते। तद्यथा सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमिति। ननु च भोः कार्येष्वपि वर्त्तते। तद्य
था। सिद्ध ओदनः। सिद्धः सूपः। सिद्धा यवागूरिति। यावता कार्येष्वपि वर्त्तते। तत्र कुत एतत् नित्यपर्यायवाचिनो ग्रहणं। न पुनः
कार्ये यः सिद्धशब्द इति। संग्रहे तावत्कार्यप्रतिद्वंद्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति। इहापि तदेव। अथ
वा संत्येकपदान्यप्यवधारणानि। तद्यथा। अब्भक्षो वायुभक्ष इति। अप एव भक्षयति। वायुमेव भक्षयतीति गम्यते। एवमिहा
पि सिद्ध एव न साध्य इति। अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः। अत्यंतसिद्धः सिद्ध इति। तद्यथा। देवदत्तो दत्तः सत्यभामा भामे
ति। व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः। किं पुनरनेन
किन वर्ण्येन महता कंठेन नित्यशब्द एवोपात्तः यस्मिन्नुपादीयमानेऽसंदेहः स्यात्। मंगलार्थं। मांगलिक आचार्यो महतः शास्त्रौघस्य
मंगलार्थं सिद्धशब्दमादितः प्रयुंक्ते। मंगलादीनि हि शास्त्राणि प्रथंते वीरपुरुषकाणि च भवंति। आयुष्मत्पुरुषकाणि चाध्येतारश्च सि
द्धार्था यथा स्युरिति। अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्त्तते। तद्यथा। नित्यप्रहसितो नित्यप्रजल्पि ५
त इति। यावता आभीक्ष्ण्येऽपि वर्त्तते। तत्राप्यनेनैवार्थः स्यात्। व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। पश्य

हि३

नित्याचार्यो मंगलार्थं सिद्धशब्दमादितः प्रयुंक्ते भविष्यति। शक्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति। अतः सिद्धशब्द ए
वोपात्तो न नित्यशब्दः। अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते। सिद्धे शब्देऽर्थे संबंधे चेति। आकृतिमित्याह। कु
त एतत्। आकृतिर्नित्या। द्रव्यमनित्यं। अथ द्रव्ये पदार्थे कथं विग्रहः क्रियते। सिद्धे शब्देऽर्थे संबंधे चेति। नित्यो ह्यर्थव
तामर्थैरभिसंबंधः। अथवा द्रव्य एव पदार्थ एष विग्रहो न्याय्यः। सिद्धे शब्देऽर्थे संबंधे चेति। द्रव्यं हि नित्यं। आकृतिरनि
त्या। कथं ज्ञायते। एवं हि दृश्यते लोके। मृत्कयाचिदाकृत्या युक्तः पिंडो भवति। पिंडाकृतिमुपमृद्य घटिकाः क्रियंते। घटिकाकृति
मुपमृद्य कुंडिकाः क्रियंते। तथा सुवर्णं कयाचिदाकृत्या युक्तं पिंडो भवति। पिंडाकृतिमुपमृद्य रुचकाः क्रियंते। रुचकाकृतिमुपमृ
२ द्य कटकाः क्रियंते। कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियंते। पुनरावृत्तः सुवर्णपिंडः पुनरपरया आकृत्या युक्तः खदिरांगारसवर्णे कु
ण्डले भवतः। आकृतिरन्या चान्या च भवति। द्रव्यं पुनस्तदेव। आकृत्युपमर्देन द्रव्यमेवावशिष्यते। आकृतावपि पदार्थ एष विग्र
हो न्याय्यः। सिद्धे शब्देऽर्थे संबंधे चेति। ननु चोक्तमाकृतिरनित्येति। नैतदस्ति। नित्याकृतिः। कथं। न क्वचिदुपरतेति कृत्वा
सर्वत्रोपरता भवति। द्रव्यांतरस्था तूपलभ्यते। अथवा नित्यमेवेदमेतन्नित्यलक्षणं। ध्रुवं कूटस्थमविचाल्यनपायो

पजनति कार्यं तु न्यन्यद्द्रव्यप्रयोगियत्तन्नित्यमिति। तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते॥ किं पुनस्तत्त्वं तद्भावस्त-
त्त्वं। आकृतावपि तत्त्वं न विहन्यते। अथवा किं न एतेन इदं नित्यमिदमनित्यमिति। यं नित्यं तं पदार्थं मत्वैष विग्रहः
क्रियते। सिद्धे शब्देऽर्थे संबंधे चेति। कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः संबंधश्चेति। लोकतः॥ यल्लोकेऽर्थमर्थमुपादा-
य शब्दान्प्रयुंजते। नैषां निर्वृत्तौ यत्नं कुर्वंति। ये पुनः कार्या भावाः निर्वृत्तौ ताव